ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

(वाक्य सहित)

# षष्ठकाण्डे द्वितीयः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.1** **September 30, 2021**

# Version Notes:

**This is now the current Version 1.1 dated September 30, 2021.**

1. This replaces the earlier version 1.0 dated June 30, 2021.

2. We have listened to the Pada Parayanam telecast by TTD channel. No corrections found . Further , no corrections found and reported till September 30, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 31st Oct 2019 |
| 4th | Version Number | 1.0 dated 30th June 2021 |

## Contents

6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं 4

6.2 षष्ठकाण्डे द्वितीयः प्रश्नः–सोममन्त्रब्राह्मणनिरूपणं ............... 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं

## 6.2 षष्ठकाण्डे द्वितीयः प्रश्नः–सोममन्त्रब्राह्मणनिरूपणं

**TS 6.2.1.1**

यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्–यज्ञं ँवि च्छिन्द्याद्–यदुभावविमुच्य
यथा ऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्–विमुक्तो–
ऽन्योऽनड्वान् भवत्यविमुक्तो ऽन्यो ऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य सन्तत्यै
पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति यद्–वै
पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवै– [ ] **1**

**TS 6.2.1.1 - Padam**

यत् । उभौ । विमुच्येति वि–मुच्य । आतिथ्यम् । गृह्णीयात् । यज्ञम् ।
वीति । छिन्द्यात् । यत् । उभौ । अविमुच्येत्यवि – मुच्य । यथा ।
अनागतायेत्यना–गताय । आतिथ्यम् । क्रियते । तादृक् । एव । तत् ।
विमुक्त इति वि – मुक्तः । अन्यः । अनड्वान् । भवति ।

अविमुक्त इत्यवि – मुक्तः । अन्यः । अथ । आतिथ्यम् । गृह्णाति । यज्ञस्य । सन्तत्या इति सं – तत्यै । पत्नी । अन्वारभत इत्यनु – आरभते । पत्नी । हि । पारीणह्यस्येति पारि – नह्यस्य । ईशे । पत्निया । एव । अनुमतमित्यनु – मतम् । निरिति । वपति । यत् । वै । पत्नी । यज्ञस्य । करोति । मिथुनम् । तत् । अथो इति । पत्नियाः । एव । **1 (50)**

**TS 6.2.1.2**

–ष यज्ञस्यान्वारंभो ऽनवच्छित्त्यै यावद्भिर्वै राजा ऽनुचरै–रागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दा७ंसि खलु वै सोमस्य राज्ञो ऽनुचराण्यग्ने–रातिथ्य–मसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्याऽऽतिथ्य–मसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथे–रातिथ्य–मसि विष्णवे त्वेत्याह जगत्या– [ ] **2**

**TS 6.2.1.2 - Padam**

एषः । यज्ञस्य । अन्वारम्भ इत्यनु – आरम्भः । अनवच्छित्त्या इत्यनव – छित्त्यै । यावद्भिरिति यावत् – भिः । वै । राजा ।

अनुचरैरित्यनु – चरैः । आगच्छतीत्या – गच्छति । सर्वेभ्यः । वै ।
तेभ्यः । आतिथ्यम् । क्रियते । छन्दाꣳसि । खलु । वै । सोमस्य ।
राज्ञः । अनुचराणीत्यनु – चराणि । अग्नेः । आतिथ्यम् । असि ।
विष्णवे । त्वा । इति । आह । गायत्रियै । एव । एतेन । करोति ।
सोमस्य । आतिथ्यम् । असि । विष्णवे । त्वा । इति । आह ।
त्रिष्टुभे । एव । एतेन । करोति । अतिथेः । आतिथ्यम् । असि ।
विष्णवे । त्वा । इति । आह । जगत्यै । **2 (50)**

**<u>TS 6.2.1.3</u>**

एवैतेन करोत्यग्नये त्वा रायस्पोषदाव्.न्ने विष्णवे त्वेत्याहानुष्टुभ
एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया
एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो
यज्ञमेवाव रुन्धे ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद्–गायत्रिया
उभयत आतिथ्यस्य क्रियत इति यदेवादः सोममा– [ ] **3**

**TS 6.2.1.3 - Padam**

एव । एतेन । करोति । अग्नये । त्वा । रायस्पोषदाव्.न्न इति

रायस्पोष – दाव्.न्ने । विष्णवे । त्वा । इति । आह ।

अनुष्टुभ इत्यनु – स्तुभे । एव । एतेन । करोति । श्येनाय । त्वा ।

सोमभृत इति सोम – भृते । विष्णवे । त्वा । इति । आह । गायत्रियै

। एव । एतेन । करोति । पञ्च । कृत्वः । गृह्णाति । पञ्चाक्षरेति

पञ्च – अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति ।

रुन्धे । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । कस्मात् ।

सत्यात् । गायत्रियै । उभयतः । आतिथ्यस्य । क्रियते । इति । यत् ।

एव । अदः । सोमम् । एति । **3 (50)**

**TS 6.2.1.4**

ऽहरत् तस्माद्–गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चो

परिष्टाच्च शिरो वा एतद् यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो

भवति तस्मान्नवधा शिरो विष्यूतं नवकपालः पुरोडाशो भवति ते

त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सम्मितास्तेज–स्त्रिवृत् तेज

एव यज्ञस्य शीर्.षन् दधाति नवकपालः पुरोडाशो भवति ते त्रय–स्त्रिकपालास्त्रिवृता प्राणेन सम्मितास्त्रिवृद् वै– [ ] 4

**TS 6.2.1.4 - Padam**

अहरत् । तस्मात् । गायत्रियै । उभयतः । आतिथ्यस्य । क्रियते । पुरस्तात् । च । उपरिष्टात् । च । शिरः । वै । एतत् । यज्ञस्य । यत् । आतिथ्यम् । नवकपाल इति नव – कपालः । पुरोडाशः । भवति । तस्मात् । नवधेति नव – धा । शिरः । विष्यूतमिति वि – स्यूतम् । नवकपाल इति नव – कपालः । पुरोडाशः । भवति । ते । त्रयः । त्रिकपाला इति त्रि – कपालाः । त्रिवृतेति त्रि – वृता । स्तोमेन । सम्मिता इति सं – मिताः । तेजः । त्रिवृदिति त्रि – वृत् । तेजः । एव । यज्ञस्य । शीर्.षन्न् । दधाति । नवकपाल इति नव–कपालः । पुरोडाशः । भवति । ते । त्रयः । त्रिकपाला इति त्रि – कपालाः । त्रिवृतेति त्रि–वृता । प्राणेनेति प्र–अनेन । सम्मिता इति सं–मिताः । त्रिवृदिति त्रि – वृत् । वै । 4 (50)

**TS 6.2.1.5**

प्राण–स्त्रिवृतमेव प्राणमभिपूर्वं यँज्ञस्य शीर्.षन् दधाति

प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववाला ऐक्षवी तिरश्ची यदाश्ववालः

प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः सं भरति देवा वै या

आहुतीरजुहवुस्ता असुरा निष्काव–मादन् ते देवाः कार्ष्मर्य–मपश्यन्

कर्मण्यो वै कर्मैनेन कुर्वीतेति ते कार्ष्मर्यमयान् परिधीन– [ ] 5

**TS 6.2.1.5 - Padam**

प्राण इति प्र –अनः । त्रिवृतमिति त्रि – वृतम् । एव । प्राणमिति

प्र –अनम् । अभिपूर्वमित्यभि – पूर्वम् । यज्ञस्य । शीर्.षन्न् ।

दधाति । प्रजापतेरिति प्रजा – पतेः । वै । एतानि । पक्ष्माणि । यत् ।

अश्ववाला इत्यश्व – वालाः । ऐक्षवी इति । तिरश्ची इति । यत् ।

आश्ववाल इत्याश्व – वालः । प्रस्तर इति प्र – स्तरः । भवति ।

ऐक्षवी इति । तिरश्ची इति । प्रजापतेरिति प्रजा –पतेः । एव । तत् ।

चक्षुः । समिति । भरति । देवाः । वै । याः । आहुतीरित्या – हुतीः ।

अजुहवुः । ताः । असुराः । निष्कावम् । आदन्न् । ते । देवाः ।

कार्ष्मर्यम् । अपश्यन्न् । कर्मण्यः । वै । कर्म । एनेन । कुर्वीत ।

इति । ते । कार्ष्मर्यमयानिति कार्ष्मर्य – मयान् ।

परिधीनिति परि – धीन् । **5 (50)**

**<u>TS 6.2.1.6</u>**

–कुर्वत तैर्वै ते रक्षा(ग्ं)स्यपाघ्नत यत् कार्ष्मर्यमयाः परिधयो भवन्ति

रक्षसामपहत्यै स(ग्ं) स्पर्.शयति रक्षसा–मनन्ववचाराय न पुरस्तात्

परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्–रक्षा(ग्ं)स्यपहन्त्यूर्द्ध्वे समिधावा

दधात्युपरिष्टादेव रक्षा(ग्ं)स्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय

द्वे आ दधाति द्विपाद्–यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्त्य– [ ] **6**

**<u>TS 6.2.1.6 - Padam</u>**

अकुर्वत । तैः । वै । ते । रक्षा(ग्ं)सि । अपेति । अघ्नत । यत् ।

कार्ष्मर्यमया इति कार्ष्मर्य – मयाः । परिधय इति परि – धयः ।

भवन्ति । रक्षसाम् । अपहत्या इत्यप – हत्यै । समिति ।

स्पर्.शयति । रक्षसाम् । अनन्ववचारायेत्यननु – अवचाराय । न ।

पुरस्तात् । परीति । दधाति । आदित्यः । हि । एव ।

उद्यन्नित्युत्– यन्न् । पुरस्तात् । रक्षाᳬंसि । अपहन्तीत्यप – हन्ति ।

ऊर्द्ध्वे इति । समिधाविति सं – इधौ । एति । दधाति । उपरिष्टात् ।

एव । रक्षाᳬंसि । अपेति । हन्ति । यजुषा । अन्याम् । तूष्णीम् ।

अन्याम् । मिथुनत्वायेति मिथुन – त्वाय । द्वे इति । एति । दधाति ।

द्विपादिति द्वि – पात् । यजमानः । प्रतिष्ठित्या इति प्रति – स्थित्यै ।

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । **6 (50)**

**TS 6.2.1.7**

–ग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यं क्रियते नाग्नय इति

यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियते

ऽथो खल्वाहुरग्निः सर्वा देवता इति यद्धविरासाद्याग्निं मन्थति

हव्यायैवाऽऽ*सन्नाय सर्वा देवता जनयति ॥ **7**

**TS 6.2.1.7 - Padam**

अग्निः । च । वै । एतौ । सोमः । च । कथा । सोमाय । आतिथ्यम् ।

क्रियते । न । अग्नये । इति । यत् । अग्नौ । अग्निम् । मथित्वा ।

प्रहरतीति प्र – हरति । तेन । एव । अग्नये । आतिथ्यम् । क्रियते ।

अथो इति । खलु । आहुः । अग्निः । सर्वाः । देवताः । इति । यत् ।
हविः । आसाद्येत्या – साद्य । अग्निम् । मन्थति । हव्याय । एव ।
आसन्नायेत्या – सन्नाय । सर्वाः । देवताः । जनयति ॥ **7 (41)**

*(पत्निया एव – जगत्या – आ – त्रिवृद्वै – परिधीन् – वदन्त्ये – कचत्वारिꣳशच्च) (A1)*

**TS 6.2.2.1**

देवासुराः सँयत्ता आसन् ते देवा मिथो विप्रिया आसन्
तेऽ(1)न्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः
सोमो रुद्रैरिन्द्रो मरुद्भि–र्वरुण आदित्यै–र्बृहस्पति–र्विश्वैर्देवैस्ते
ऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रद्ध्यामो यन्मिथो विप्रियाः
स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स
निर्. ऋच्छाद् यो– [ ] **8**

**TS 6.2.2.1 - Padam**

देवासुरा इति देव – असुराः । सँयत्ता इति सं–यत्ताः । आसन्न् ।
ते । देवाः । मिथः । विप्रिया इति वि – प्रियाः । आसन्न् । ते ।

अन्यः । अन्यस्मै । ज्यैष्ठ्याय । अतिष्ठमानाः । पञ्चधेति पञ्च–धा । वीति । अक्रामन्न् । अग्निः । वसुभिरिति वसु – भिः । सोमः । रुद्रैः । इन्द्रः । मरुद्भिरिति मरुत् – भिः । वरुणः । आदित्यैः । बृहस्पतिः । विश्वैः । देवैः । ते । अमन्यन्त । असुरेभ्यः । वै । इदम् । भ्रातृव्येभ्यः । रद्ध्यामः । यत् । मिथः । विप्रिया इति वि – प्रियाः । स्मः । याः । नः । इमाः । प्रियाः । तनुवः । ताः । समवद्यामहा इति सं – अवद्यामहै । ताभ्यः । सः । निरिति । ऋच्छात् । यः । **8 (50)**

**TS 6.2.2.2**

नः प्रथमो(1)ऽन्योऽन्यस्मै द्रुह्यादिति तस्माद्–यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्च्छति यत् तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परा ऽस्य भ्रातृव्यो भवति पञ्च कृत्वो ऽव द्यति पञ्चधा हि ते तथ् समवाद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आपतये त्वा गृह्णामीत्याह प्राणो वा– [ ] **9**

**TS 6.2.2.2 - Padam**

नः । प्रथमः । अन्यः । अन्यस्मै । द्रुह्यात् । इति । तस्मात् । यः ।
सतानूनप्त्रिणामिति स – तानूनप्त्रिणाम् । प्रथमः । द्रुह्यति । सः ।
आर्तिम् । एति । ऋच्छति । यत् । तानूनप्त्रमिति तानू – नप्त्रम् ।
समवद्यतीति सं–अवद्यति । भ्रातृव्याभिभूत्या इति भ्रातृव्य–अभिभूत्यै ।
भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । पञ्च ।
कृत्वः । अवेति । द्यति । पञ्चधेति पञ्च – धा । हि । ते । तत् ।
समवाद्यन्तेति सं – अवाद्यन्त । अथो इति । पञ्चाक्षरेति
पञ्च – अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति ।
रुन्धे । आपतय इत्या – पतये । त्वा । गृह्णामि । इति । आह ।
प्राण इति प्र – अनः । वै । **9 (50)**

**TS 6.2.2.3**

आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन
एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवाद्यन्त
शाक्वरायेत्याह शक्त्यै हि ते ताः समवाद्यन्त शक्म–

न्नोजिष्ठायेत्याहौजिष्ठ॒ꣳ हि ते तदात्मनः समवाद्यन्ता-नाधृष्टमस्यनाधृष्य-मित्याहानाधृष्ट॒ꣳ ह्येतदनाधृष्यं देवानामोज- [ ] 10

**TS 6.2.2.3 - Padam**

आपतिरित्या - पतिः । प्राणमिति प्र - अनम् । एव । प्रीणाति ।
परिपतय इति परि - पतये । इति । आह । मनः । वै ।
परिपतिरिति परि - पतिः । मनः । एव । प्रीणाति । तनूनप्त्र इति तनू - नप्त्रे । इति । आह । तनुवः । हि । ते । ताः । समवाद्यन्तेति सं- अवाद्यन्त । शाक्वराय । इति । आह । शक्त्यै । हि । ते । ताः । समवाद्यन्तेति सं-अवाद्यन्त । शक्मन्न् । ओजिष्ठाय । इति । आह ।
ओजिष्ठम् । हि । ते । तत् । आत्मनः । समवाद्यन्तेति सं-अवाद्यन्त ।
अनाधृष्टमित्यना - धृष्टम् । असि । अनाधृष्यमित्यना - धृष्यम् ।
इति । आह । अनाधृष्टमित्यना - धृष्टम् । हि । एतत् ।
अनाधृष्यमित्यना - धृष्यम् । देवानाम् । ओजः । 10 (50)

**TS 6.2.2.4**

इत्याह देवाना७ ह्येतदोजो ऽभिशस्तिपा अनभिशस्तेन्य-मित्याहा-

भिशस्तिपा ह्येतद-नभिशस्तेन्य-मनु मे दीक्षां दीक्षापति-

र्मन्यतामित्याह यथायजुरेवैतद्-घृतं ँवै देवा वज्रं कृत्वा सोम-मघ्न-

न्नन्तिक-मिव खलु वा अस्यैतच्चरन्ति यत् तानूनप्त्रेण

प्रचरन्त्य७शुर७शु-स्ते देव सोमाऽऽ प्यायतामित्याह य- [ ] 11

**TS 6.2.2.4 - Padam**

इति । आह । देवानाम् । हि । एतत् । ओजः । अभिशस्तिपा

इत्यभिशस्ति-पाः । अनभिशस्तेन्यमित्यनभि - शस्तेन्यम् । इति ।

आह । अभिशस्तिपा इत्यभिशस्ति - पाः । हि । एतत् ।

अनभिशस्तेन्यमित्यनभि - शस्तेन्यम् । अन्विति । मे । दीक्षाम् ।

दीक्षापतिरिति दीक्षा - पतिः । मन्यताम् । इति । आह ।

यथायजुरिति यथा - यजुः । एव । एतत् । घृतम् । वै । देवाः ।

वज्रम् । कृत्वा । सोमम् । अघ्नन्न् । अन्तिकम् । इव । खलु । वै ।

अस्य । एतत् । चरन्ति । यत् । तानूनप्त्रेणेति तानू - नप्त्रेण ।

प्रचरन्तीति प्र – चरन्ति । अ॒ꣳशुर॑ꣳशुरित्य॒ꣳशुः–अ॒ꣳशुः । ते ।

दे॒व । सो॒म । एति । प्याय॒ताम् । इति । आ॒ह । यत् । **11 (50)**

**TS 6.2.2.5**

–दे॒वास्यापु॒वाय॒ते यन्मीय॒ते–तदे॒वास्यै॒तेनाऽऽ प्यायय॒त्या

तु॒भ्यमिन्द्रः प्यायता॒मा त्वमिन्द्राय प्याय॒स्वेत्या–हो॒भावे॒वेन्द्रं च॒

सो॒मं चाऽऽ*प्यायय॒त्या प्याय॒य सखीन्थ् स॒न्या मे॒धयेत्याह॒र्त्विजो॒

वा अ॒स्य सखा॒यस्ता॒नेवाऽऽ प्यायय॒ति स्व॒स्ति ते देव सोम

सु॒त्याम॒शी॒ये– [ ] **12**

**TS 6.2.2.5 - Padam**

ए॒व । अ॒स्य॒ । अ॒पु॒वा॒यते । यत् । मीयते । तत् । ए॒व । अ॒स्य॒ ।

ए॒तेन । एति । प्याय॒य॒ति । एति । तुभ्यम् । इन्द्रः । प्याय॒ताम् ।

एति । त्वम् । इन्द्राय । प्याय॒स्व॒ । इति । आ॒ह । उ॒भौ । ए॒व ।

इन्द्रम् । च॒ । सोमम् । च॒ । एति । प्याय॒य॒ति । एति । प्याय॒य ।

सखीन् । स॒न्या । मे॒धया । इति । आ॒ह । ऋ॒त्विजः । वै । अ॒स्य॒ ।

सखायः । तान् । एव । एति । प्याययति । स्वस्ति । ते । देव ।

सोम । सुत्याम् । अशीय । **12 (50)**

**TS 6.2.2.6**

-त्याहाऽऽशिषमेवैतामा शास्ते प्र वा एते ऽस्मा-ल्लोकाच्च्यवन्ते ये

सोममा-प्याययन्त्य-न्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः

प्रेषे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिन् ँल्लोके

प्रति तिष्ठन्ति देवासुराः सँयत्ता आसन् ते देवा बिभ्यतोऽग्निं प्राविशन्

तस्मादाहुरग्निः सर्वा देवता इति ते- [ ] **13**

**TS 6.2.2.6 - Padam**

इति । आह । आशिषमित्या-शिषम् । एव । एताम् । एति । शास्ते ।

प्रेति । वै । एते । अस्मात् । लोकात् । च्यवन्ते । ये । सोमम् ।

आप्याययन्तीत्या-प्याययन्ति । अन्तरिक्षदेवत्य इत्यन्तरिक्ष-देवत्यः ।

हि । सोमः । आप्यायित इत्या - प्यायितः । एष्टः । रायः । प्रेति ।

इषे । भगाय । इति । आह । द्यावापृथिवीभ्यामिति

द्यावा - पृथिवीभ्याम् । एव । नमस्कृत्येति नमः - कृत्य ।

अस्मिन्न् । लोके । प्रतीति । तिष्ठन्ति । देवासुरा इति देव–असुराः ।
सँयत्ता इति सं – यत्ताः । आसन्न् । ते । देवाः । बिभ्यतः ।
अग्निम् । प्रेति । अविशन्न् । तस्मात् । आहुः ।
अग्निः । सर्वाः । देवताः । इति । ते । **13 (50)**

**TS 6.2.2.7**

ऽग्निमेव वरूथं कृत्वा ऽसुरानभ्यभव–न्नग्निमिव खलु वा एष
प्र विशति यो ऽवान्तरदीक्षा–मुपैति भ्रातृव्याभिभूत्यै भवत्यात्मना
परा ऽस्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया
सन्तरां मेखला७ँ समायच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो
भवति मदन्तीभिर्मार्जयते निर्ह्यग्निः शीतेन वायति समिद्ध्यै या ते
अग्ने ( ) रुद्रिया तनूरित्याह स्वयैवैनद् देवतया व्रतयति सयोनित्वाय
शान्त्यै ॥ **14**

**TS 6.2.2.7 - Padam**

अग्निम् । एव । वरूथम् । कृत्वा । असुरान् । अभीति । अभवन्न् ।
अग्निम् । इव । खलु । वै । एषः । प्रेति । विशति । यः ।

अवान्तरदीक्षामित्यवान्तर – दीक्षाम् । उपैतीत्युप – एति ।

भ्रातृव्याभिभूत्या इति भ्रातृव्य – अभिभूत्यै । भवति । आत्मना ।

परेति । अस्य । भ्रातृव्यः । भवति । आत्मानम् । एव । दीक्षया ।

पाति । प्रजामिति प्र – जाम् । अवान्तरदीक्षयेत्यवान्तर – दीक्षया ।

सन्तरामिति सं – तराम् । मेखलाम् । समायच्छत इति

सं – आयच्छते । प्रजेति प्र – जा । हि । आत्मनः ।

अन्तरतरेत्यन्तर – तरा । तप्तव्रत इति तप्त – व्रतः । भवति ।

मदन्तीभिः । मार्जयते । निरिति । हि । अग्निः । शीतेन । वायति ।

समिद्ध्या इति सं–इद्ध्यै । या । ते । अग्ने ( ) । रुद्रिया । तनूः ।

इति । आह । स्वया । एव । एनत् । देवतया । व्रतयति ।

सयोनित्वायेति सयोनि – त्वाय । शान्त्यै ॥ **14 (61)**

*(यो – वा – ओज – आह य – दशीये – ति ते – ऽग्न – एकादश च) (A2)*

**TS 6.2.3.1**

तेषामसुराणां तिस्रः पुर आस–न्नयस्म–य्यवमा ऽथ रजता ऽथ हरिणी ता देवा जेतुं नाशक्नुवन् ता उपसदैवाजिगीषन् तस्मादाहुर्यश्चैवं ँवेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुꣳ स–मस्कुर्वता–ग्निमनीकꣳ सोमꣳ शल्यं ँविष्णुं तेजनं ते ऽब्रुवन् क इमामसिष्यतीति– [ ] **15**

**TS 6.2.3.1 - Padam**

तेषाम् । असुराणाम् । तिस्रः । पुरः । आसन्न् । अयस्मयी । अवमा । अथ । रजता । अथ । हरिणी । ताः । देवाः । जेतुम् । न । अशक्नुवन्न् । ताः । उपसदेत्युप – सदा । एव । अजिगीषन्न् । तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । उपसदेत्युप – सदा । वै । महापुरमिति महा – पुरम् । जयन्ति । इति । ते । इषुम् । समिति । अकुर्वत । अग्निम् । अनीकम् । सोमम् । शल्यम् । विष्णुम् । तेजनम् । ते । अब्रुवन्न् । कः । इमाम् । असिष्यति । इति । **15 (50)**

**TS 6.2.3.2**

रुद्र इत्यब्रुवन् रुद्रो वै क्रूरः सो ऽस्यत्विति सो ऽब्रवीद् वरं वृणा अहमेव पशूना–मधिपतिरसानीति तस्माद् रुद्रः पशूना–मधिपतिस्ता ७ रुद्रो ऽवासृजथ् स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्यो–ऽसुरान् प्राणुदत यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्यै नान्यामाहुतिं पुरस्ता–ज्जुहुयाद्–यदन्यामाहुतिं पुरस्ताज्जुहुया– [ ] **16**

**TS 6.2.3.2 - Padam**

रुद्रः । इति । अब्रुवन्न् । रुद्रः । वै । क्रूरः । सः । अस्यतु । इति । सः । अब्रवीत् । वरम् । वृणै । अहम् । एव । पशूनाम् । अधिपतिरित्यधि – पतिः । असानि । इति । तस्मात् । रुद्रः । पशूनाम् । अधिपतिरित्यधि – पतिः । ताम् । रुद्रः । अवेति । असृजत् । सः । तिस्रः । पुरः । भित्वा । एभ्यः । लोकेभ्यः । असुरान् । प्रेति । अनुदत । यत् । उपसद इत्युप – सदः । उपसद्यन्त इत्युप–सद्यन्ते । भ्रातृव्यपराणुत्या इति भ्रातृव्य–पराणुत्यै । न । अन्याम् । आहुतिमित्या – हुतिम् । पुरस्तात् । जुहुयात् । यत् । अन्याम् । आहुतिमित्या – हुतिम् । पुरस्तात् । जुहुयात् । **16 (50)**

**TS 6.2.3.3**

दन्यन्मुखं कुर्याथ् स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यै

पराङतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान्

प्र णुदते पुन–रत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो

भ्रातृव्याञ्जित्वा भ्रातृव्यलोक–मभ्यारोहति देवा वै याः प्रातरुपसद

उपासीद–न्नह्नस्ताभिरसुरान् प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यथ्

सायंप्रातरुपसद– [ ] **17**

**TS 6.2.3.3 - Padam**

अन्यत् । मुखम् । कुर्यात् । स्रुवेण । आघारमित्या – घारम् । एति ।

घारयति । यज्ञस्य । प्रज्ञात्या इति प्र – ज्ञात्यै । पराङ् ।

अतिक्रम्येत्यति – क्रम्य । जुहोति । पराचः । एव । एभ्यः ।

लोकेभ्यः । यजमानः । भ्रातृव्यान् । प्रेति । नुदते ।

पुनः । अत्याक्रम्येत्यति – आक्रम्य । उपसदमित्युप – सदम् ।

जुहोति । प्रणुद्येति प्र – नुद्य । एव । एभ्यः । लोकेभ्यः ।

भ्रातृव्यान् । जित्वा । भ्रातृव्यलोकमिति भ्रातृव्य – लोकम् ।

अभ्यारोहतीत्यभि – आरोहति । देवाः । वै । याः । प्रातः । उपसद इत्युप – सदः । उपासीदन्नित्युप – असीदन्न् । अह्नः । ताभिः । असुरान् । प्रेति । अनुदन्त । याः । सायम् । रात्रियै । ताभिः । यत् । सायम्प्रातरिति सायम् – प्रातः । उपसद इत्युप – सदः । **17 (50)**

**TS 6.2.3.4**

उपसद्यन्ते ऽहोरात्राभ्यामेव तद्–यजमानो भ्रातृव्यान् प्र णुदते याः प्रातर्याज्याः स्यु स्ताः सायं पुरोनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान् प्रीणाति षट्थ् सं पद्यन्ते षड् वा ऋतव ऋतूनेव प्रीणाति द्वादशाहीने सोम उपैति द्वादश मासाः सँवथ्सरः संवथ्सरमेव प्रीणाति चतुर्वि२ँशतिः सं– [ ] **18**

**TS 6.2.3.4 - Padam**

उपसद्यन्त इत्युप – सद्यन्ते । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एव । तत् । यजमानः । भ्रातृव्यान् । प्रेति । नुदते । याः । प्रातः ।

याज्याः । स्युः । ताः । सायम् । पुरोनुवाक्या इति

पुरः – अनुवाक्याः । कुर्यात् । अयातयामत्वायेत्ययातयाम – त्वाय ।

तिस्रः । उपसद इत्युप – सदः । उपेति । एति । त्रयः । इमे ।

लोकाः । इमान् । एव । लोकान् । प्रीणाति । षट् । समिति ।

पद्यन्ते । षट् । वै । ऋतवः । ऋतून् । एव । प्रीणाति । द्वादश ।

अहीने । सोमे । उपेति । एति । द्वादश । मासाः । सँवथ्सर इति

सं – वथ्सरः । सँवथ्सरमिति सं – वथ्सरम् । एव । प्रीणाति ।

चतुर्वि॒ꣳशतिरिति चतुः – वि॒ꣳशतिः । समिति । **18 (50)**

**TS 6.2.3.5**

पद्यन्ते चतुर्वि॒ꣳशति–रर्द्धमासा अर्द्धमासानेव प्रीणात्याराग्रा–

मवान्तरदीक्षा–मुपेयाद्–यः कामयेतास्मिन् मे लोके ऽर्द्धुकꣳ

स्यादित्येकमग्रे ऽथ द्वावथ त्रीनथ चतुर एषा वा आराग्रा

ऽवान्तरदीक्षा ऽस्मिन्नेवास्मै लोके ऽर्द्धुकं भवति परोवरीयसी–

मवान्तरदीक्षा–मुपेयाद्–यः कामयेतामुष्मिन् मे लोके ऽर्द्धुकꣳ

स्यादिति चतुरो ऽग्रे ( ) ऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्य–
वान्तरदीक्षा ऽमुष्मिन्नेवास्मै लोके ऽर्द्धुकं भवति ॥ 19

**TS 6.2.3.5 - Padam**

पद्यन्ते । चतुर्वि॒ंशतिरिति चतुः – वि॒ंशतिः । अर्द्धमासा
इत्यर्द्ध – मासाः । अर्द्धमासानित्यर्द्ध – मासान् । एव । प्रीणाति ।
आराग्रामित्यारा – अग्राम् । अवान्तरदीक्षामित्यवान्तर – दीक्षाम् ।
उपेति । इयात् । यः । कामयेत । अस्मिन्न् । मे । लोके ।
अर्द्धुकम् । स्यात् । इति । एकम् । अग्रे । अथ । द्वौ । अथ ।
त्रीन् । अथ । चतुरः । एषा । वै । आराग्रेत्यारा – अग्रा ।
अवान्तरदीक्षेत्यवान्तर – दीक्षा । अस्मिन्न् । एव । अस्मै । लोके ।
अर्द्धुकम् । भवति । परोवरीयसीमिति परः – वरीयसीम् ।
अवान्तरदीक्षामित्यवान्तर – दीक्षाम् । उपेति । इयात् । यः ।
कामयेत । अमुष्मिन्न् । मे । लोके । अर्द्धुकम् । स्यात् । इति ।
चतुरः । अग्रे ( ) । अथ । त्रीन् । अथ । द्वौ । अथ । एकम् ।
एषा । वै । परोवरीयसीति परः – वरीयसि ।

अवान्तरदीक्षेत्यवान्तर – दीक्षा । अमुष्मिन्न् । एव । अस्मै । लोके । अर्द्धुकम् । भवति ॥ **19 (66)** *(असिष्यतीति – जुहुयाथ् – सायं प्रातरुपसद – श्चतुर्विꣳशतिः सं – चतुरोऽग्रे – षोडश च) (A3)*

**TS 6.2.4.1**

सुवर्गं ँवा एते लोकं ँयन्ति य उपसद उपयन्ति तेषां ँय उन्नयते हीयत एव स नोदनेषीति सून्नीयमिव यो वै स्वार्थेतां ँयताꣳ श्रान्तो हीयत उत स निष्ष्याय सह वसति तस्माथ् सकृदुन्नीय नापरमुन्नयेत दद्ध्नोन्नयेतैतद्–वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे– [ ] **20**

**TS 6.2.4.1 - Padam**

सुवर्गमिति सुवः – गम् । वै । एते । लोकम् । यन्ति । ये । उपसद इत्युप – सदः । उपयन्तीयुप – यन्ति । तेषाम् । यः । उन्नयत इत्युत् – नयते । हीयते । एव । सः । न । उदिति । अनेषि । इति । सून्नीयमिति सु – उन्नीयम् । इव । यः । वै । स्वार्थेतामिति स्वार्थ–इताम् । यताम् । श्रान्तः । हीयते । उत । सः । निष्ष्याय । सह । वसति । तस्मात् । सकृत् । उन्नीयेत्युत्–नीय ।

न । अपरम् । उदिति । नयेत । दद्ध्ना । उदिति । नयेत । एतत् ।
वै । पशूनाम् । रूपम् । रूपेण । एव । पशून् ।
अवेति । रुन्धे । **20 (50)**

**TS 6.2.4.2**

यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राविशत्
तं देवा हस्तान्थ् सꣳरभ्यैच्छन् तमिन्द्र उपर्युपर्यत्यक्रामथ्
सो ऽब्रवीत् को मा ऽय–मुपर्युपर्यत्यक्रमी–दित्यहं दुर्गे हन्तेत्यथ
कस्त्वमित्यहं दुर्गादाहर्तेति सो ऽब्रवीद् दुर्गे वै हन्ता ऽवोचथा
वराहो ऽयं ँवाममोषः– [ ] **21**

**TS 6.2.4.2 - Padam**

यज्ञः । देवेभ्यः । निलायत । विष्णुः । रूपम् । कृत्वा । सः ।
पृथिवीम् । प्रेति । अविशत् । तम् । देवाः । हस्तान् ।
सꣳरभ्येति सं – रभ्य । ऐच्छन्न् । तम् । इन्द्रः ।
उपर्युपरीत्युपरि – उपरि । अतीति । अक्रामत् । सः । अब्रवीत् ।
कः । मा । अयम् । उपर्युपरीत्युपरि – उपरि । अतीति । अक्रमीत् ।

इति । अहम् । दुर्ग इति दुः – गे । हन्ता । इति । अथ । कः ।
त्वम् । इति । अहम् । दुर्गादिति दुः – गात् । आहर्तेत्या – हर्ता ।
इति । सः । अब्रवीत् । दुर्ग इति दुः – गे । वै । हन्ता ।
अवोचथाः । वराहः । अयम् ।
वाममोष इति वाम – मोषः । **21 (50)**

**TS 6.2.4.3**

सप्तानां गिरीणां परस्ताद्–वित्तं वेँद्यमसुराणां बिभर्ति तं जहि
यदि दुर्गे हन्ता ऽसीति स दर्भपुञ्जीलमुद्वृह्य सप्त गिरीन्
भित्त्वा तमहन्थ् सो ऽब्रवीद् दुर्गाद्–वा आहर्ता ऽवोचथा एतमा हरेति
तमेभ्यो यज्ञ एव यज्ञमा ऽहरद्–यत् तद्–वित्तं वेँद्यमसुराणा–
मविन्दन्त तदेकं वेँद्यै वेदित्वमसुराणां– [ ] **22**

**TS 6.2.4.3 - Padam**

सप्तानाम् । गिरीणाम् । परस्तात् । वित्तम् । वेद्यम् । असुराणाम् ।
बिभर्ति । तम् । जहि । यदि । दुर्ग इति दुः – गे । हन्ता ।
असि । इति । सः । दर्भपुञ्जीलमिति दर्भ – पुञ्जीलम् ।

उद्वृह्येत्युत् – वृह्य । सप्त । गिरीन् । भित्वा । तम् । अहन्न् । सः ।
अब्रवीत् । दुर्गादिति दुः – गात् । वै । आहर्तेत्या – हर्ता ।
अवोचथाः । एतम् । एति । हर । इति । तम् । एभ्यः । यज्ञः ।
एव । यज्ञम् । एति । अहरत् । यत् । तत् । वित्तम् । वेद्यम् ।
असुराणाम् । अविन्दन्त । तत् । एकम् । वेद्यै ।
वेदित्वमिति वेदि – त्वम् । असुराणाम् । **22 (50)**

**TS 6.2.4.4**

ँवा इयमग्र आसीद् यावदासीनः परापश्यति तावद् देवानां ते देवा अब्रुवन्नस्त्वेव नो ऽस्यामपीति कियद्–वो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत् तदिमामविन्दन्त यदिमामविन्दन्त तद् वेद्यै वेदित्वꣳ– [ ] **23**

**TS 6.2.4.4 - Padam**

वै । इयम् । अग्रे । आसीत् । यावत् । आसीनः । परापश्यतीति
परा – पश्यति । तावत् । देवानाम् । ते । देवाः । अब्रुवन्न् । अस्तु ।

एव । नः । अस्याम् । अपीति । इति । कियत् । वः । दास्यामः । इति । यावत् । इयम् । सलावृकी । त्रिः । परिक्रामतीति परि–क्रामति । तावत् । नः । दत्त । इति । सः । इन्द्रः । सलावृकी । रूपम् । कृत्वा । इमाम् । त्रिः । सर्वतः । परीति । अक्रामत् । तत् । इमाम् । अविन्दन्त । यत् । इमाम् । अविन्दन्त । तत् । वेद्यै । वेदित्वमिति वेदि – त्वम् । **23 (50)**

**TS 6.2.4.5**

सा वा इय॑ सर्वैव वेदिरियति शक्ष्यामीति त्वा अवमाय यजन्ते त्रि॒ꣳशत् पदानि पश्चात् तिरश्ची भवति षट्त्रि॒ꣳशत् प्राची चतुर्वि॒ꣳशतिः पुरस्तात् तिरश्ची दशदश सं पद्यन्ते दशाक्षरा विराडन्नं ँविराड् विराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवास्या अमेद्ध्यं तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति ( ) बर्.हिः स्तृणाति तस्मादोषधयः पुनरा भवन्त्युत्तरं बर्.हिष उत्तरबर्.हिः स्तृणाति प्रजा वै बर्.हिर्यजमान उत्तरबर्.हि र्यजमान–मेवा–यजमानादुत्तरं करोति तस्माद्–यजमानो ऽयजमानादुत्तरः ॥ **24**

**TS 6.2.4.5 - Padam**

सा । वै । इयम् । सर्वा । एव । वेदिः । इयति । शक्ष्यामि । इति ।
तु । वै । अवमायेत्यव – माय । यजन्ते । त्रि॒ꣳशत् । पदानि ।
पश्चात् । तिरश्ची । भवति । षट्त्रि॒ꣳशदिति षट् – त्रि॒ꣳशत् । प्राची ।
चतुर्वि॒ꣳशतिरिति चतुः – वि॒ꣳशतिः । पुरस्तात् । तिरश्ची ।
दशदशेति दश–दश । समिति । पद्यन्ते । दशाक्षरेति दश–अक्षरा ।
विराडिति वि – राट् । अन्नम् । विराडिति वि – राट् । विराजेति
वि – राजा । एव । अन्नाद्यमित्यन्न – अद्यम् । अवेति । रुन्धे ।
उदिति । हन्ति । यत् । एव । अस्याः । अमेद्ध्यम् । तत् । अपेति ।
हन्ति । उदिति । हन्ति । तस्मात् । ओषधयः । परेति । भवन्ति ( ) ।
बर्.हिः । स्तृणाति । तस्मात् । ओषधयः । पुनः । एति । भवन्ति ।
उत्तरमित्युत् – तरम् । बर्.हिषः । उत्तरबर्.हिरित्युत्तर – बर्.हिः ।
स्तृणाति । प्रजा इति प्र – जाः । वै । बर्.हिः । यजमानः ।
उत्तरबर्.हिरित्युत्तर – बर्.हिः । यजमानम् । एव । अयजमानात् ।

उत्तरमित्युत् – तरम् । करोति । तस्मात् । यजमानः । अयजमानात् । उत्तर इत्युत् – तरः ॥ **24 (75)** *(रुन्धे – वाममोषो – वेदित्वमसुराणां – वैँदित्वं – भवन्ति – पञ्चविꣳशतिश्च) (A4)*

**TS 6.2.5.1**

यद्–वा अनीशानो भारमादत्ते वि वै स लिशते यद् द्वादश साह्नस्योपसदः स्यु स्तिस्त्रो ऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वथ्सस्यैकः स्तनो भागी हि सोऽथैकꣳ स्तनं व्रँतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद् वै– [ ] **25**

**TS 6.2.5.1 - Padam**

यत् । वै । अनीशानः । भारम् । आदत्त इत्या – दत्ते । वीति । वै । सः । लिशते । यत् । द्वादश । साह्नस्येति स – अह्नस्य । उपसद इत्युप – सदः । स्युः । तिस्त्रः । अहीनस्य । यज्ञस्य । विलोमेति वि – लोम । क्रियेत । तिस्रः । एव । साह्नस्येति स – अह्नस्य । उपसद इत्युप – सदः । द्वादश ।

अहीनस्य । यज्ञस्य । सवीर्यत्वायेति सवीर्य – त्वाय । अथो इति ।
सलोमेति स–लोम । क्रियते । वथ्सस्य । एकः । स्तनः । भागी ।
हि । सः । अथ । एकम् । स्तनम् । व्रतम् । उपेति । एति । अथ ।
द्वौ । अथ । त्रीन् । अथ । चतुरः । एतत् । वै । **25 (50)**

**TS 6.2.5.2**

क्षुरपवि नाम व्रतं ँयेन प्र जातान् भ्रातृव्यान् नुदते प्रति
जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरो ऽग्रे स्तनान्
व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्–वै सुजघनं नाम व्रतं
तपस्य॑ सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू
राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव– [ ] **26**

**TS 6.2.5.2 - Padam**

क्षुरपवीति क्षुर – पवि । नाम । व्रतम् । येन । प्रेति । जातान् ।
भ्रातृव्यान् । नुदते । प्रतीति । जनिष्यमाणान् । अथो इति । कनीयसा ।
एव । भूयः । उपेति । एति । चतुरः । अग्रे । स्तनान् । व्रतम् ।
उपेति । एति । अथ । त्रीन् । अथ । द्वौ । अथ । एकम् । एतत् । वै ।

सुजघनमिति सु – जघनम् । नाम । व्रतम् । तपस्यम् । सुवर्ग्यमिति सुवः – ग्यम् । अथो इति । प्रेति । एव । जायते । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । यवागूः । राजन्यस्य । व्रतम् । क्रूरा । इव । वै । यवागूः । क्रूरः । इव । **26 (50)**

**TS 6.2.5.3**

राजन्यो वज्रस्य रूप९ँ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पयस्तेजसैव तेजः पय आत्मन् धत्ते ऽथो पयसा वै गर्भा वर्द्धन्ते गर्भ इव खलु वा एष यद् दीक्षितो यदस्य पयो व्रतं भवत्यात्मानमेव तद् वर्द्धयति त्रिव्रतो वै मनुरासीद् द्विव्रता असुरा एकव्रता– [ ] **27**

**TS 6.2.5.3 - Padam**

राजन्यः । वज्रस्य । रूपम् । समृद्ध्या इति सं–ऋद्ध्यै । आमिक्षा । वैश्यस्य । पाकयज्ञस्येति पाक – यज्ञस्य । रूपम् । पुष्ट्यै । पयः । ब्राह्मणस्य । तेजः । वै । ब्राह्मणः । तेजः । पयः । तेजसा । एव । तेजः । पयः । आत्मन्न् । धत्ते । अथो इति । पयसा । वै । गर्भाः ।

वर्द्धन्ते । गर्भः । इव । खलु । वै । एषः । यत् । दीक्षितः । यत् ।
अस्य । पयः । व्रतम् । भवति । आत्मानम् । एव । तत् । वर्द्धयति ।
त्रिव्रत इति त्रि – व्रतः । वै । मनुः । आसीत् । द्विव्रता इति
द्वि – व्रताः । असुराः । एकव्रता इत्येक – व्रताः । **27 (50)**

**TS 6.2.5.4**

देवाः प्रातर्मद्ध्यन्दिने सायं तन् मनोर्व्रतमासीत् पाकयज्ञस्य रूपं
पुष्ट्यै प्रातश्च सायं चासुराणां निर्मद्ध्यं क्षुधो रूपं ततस्ते परा
ऽभवन् मद्ध्यन्दिने मद्ध्यरात्रे देवानां ततस्ते ऽभवन्थ् सुवर्गं
ँल्लोकमायन्. यदस्य मद्ध्यन्दिने मद्ध्यरात्रे व्रतं भवति मद्ध्यतो वा
अन्नेन भुञ्जते मद्ध्यत एव तदूर्जं धत्ते भ्रातृव्याभिभूत्यै
भवत्यात्मना– [ ] **28**

**TS 6.2.5.4 - Padam**

देवाः । प्रातः । मद्ध्यन्दिने । सायम् । तत् । मनोः । व्रतम् ।
आसीत् । पाकयज्ञस्येति पाक – यज्ञस्य । रूपम् । पुष्ट्यै । प्रातः ।
च । सायम् । च । असुराणाम् । निर्मद्ध्यमिति निः–मद्ध्यम् ।

क्षुधः । रूपम् । ततः । ते । परेति । अभवन्न् । मद्ध्यन्दिने ।
मद्ध्यरात्र इति मद्ध्य - रात्रे । देवानाम् । ततः । ते । अभवन्न् ।
सुवर्गमिति सुवः-गम् । लोकम् । आयन्न् । यत् । अस्य ।
मद्ध्यन्दिने । मद्ध्यरात्र इति मद्ध्य-रात्रे । व्रतम् । भवति ।
मद्ध्यतः । वै । अन्नेन । भुञ्जते । मद्ध्यतः । एव । तत् । ऊर्जम् ।
धत्ते । भ्रातृव्याभिभूत्या इति भ्रातृव्य - अभिभूत्यै । भवति ।
आत्मना । **28 (50)**

**TS 6.2.5.5**

परा ऽस्य भ्रातृव्यो भवति गर्भो वा एष यद् दीक्षितो योनि
र्दीक्षितविमितं ँयद् दीक्षितो दीक्षितविमितात् प्रवसेद् यथा योनेर्गर्भः
स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष वै व्याघ्रः
कुलगोपो यदग्निस्तस्माद् यद् दीक्षितः प्रवसेथ् स एनमीश्वरो ऽनूत्थाय
हन्तोर्न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शय एतद्-वै यजमानस्या
( ) ऽऽयतनꣳस्व एवाऽऽयतने शये ऽग्निमभ्यावृत्य शये देवता एव
यज्ञमभ्यावृत्य शये ॥ **29**

## TS 6.2.5.5 - Padam

परेति । अस्य । भ्रातृव्यः । भवति । गर्भः । वै । एषः । यत् ।
दीक्षितः । योनिः । दीक्षितविमितमिति दीक्षित – विमितम् । यत् ।
दीक्षितः । दीक्षितविमितादिति दीक्षित – विमितात् । प्रवसेदिति
प्र – वसेत् । यथा । योनेः । गर्भः । स्कन्दति । तादृक् । एव ।
तत् । न । प्रवस्तव्यमिति प्र – वस्तव्यम् । आत्मनः । गोपीथाय ।
एषः । वै । व्याघ्रः । कुलगोप इति कुल – गोपः । यत् । अग्निः ।
तस्मात् । यत् । दीक्षितः । प्रवसेदिति प्र – वसेत् । सः । एनम् ।
ईश्वरः । अनूत्थायेत्यनु – उत्थाय । हन्तोः । न । प्रवस्तव्यमिति
प्र – वस्तव्यम् । आत्मनः । गुप्त्यै । दक्षिणतः । शये । एतत् । वै ।
यजमानस्य ( ) । आयतनमित्या – यतनम् । स्वे । एव । आयतन
इत्या–यतने । शये । अग्निम् । अभ्यावृत्येत्यभि–आवृत्य । शये ।
देवताः । एव । यज्ञम् । अभ्यावृत्येत्यभि –आवृत्य । शये ॥ **29 (63)**

*(एतद्वै–क्रूर इवै–कव्रता–आत्मना–यजमानस्य–त्रयोदश च) (A5)*

**TS 6.2.6.1**

पुरोहविषि देवयजने याजयेद्–यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि

सुवर्गं ँलोकं जयेदित्येतद्–वै पुरोहविर्देवयजनं ँयस्य होता

प्रातरनुवाक –मनुब्रुव–न्नग्निमप आदित्यमभि विपश्यत्युपैनमुत्तरो

यज्ञो नमत्यभि सुवर्गं ँलोकं जयत्याप्ते देवयजने याजयेद्–

भ्रातृव्यवन्तं पन्थां ँवा ऽधिस्पर्.शयेत् कर्तं ँवा यावन्नानसे

यातवै– [ ] **30**

**TS 6.2.6.1 - Padam**

पुरोहविषीति पुरः–हविषि । देवयजन इति देव–यजने । याजयेत् ।

यम् । कामयेत । उपेति । एनम् । उत्तर इत्युत् – तरः । यज्ञः ।

नमेत् । अभीति । सुवर्गमिति सुवः–गम् । लोकम् । जयेत् । इति ।

एतत् । वै । पुरोहविरिति पुरः–हविः । देवयजनमिति देव–यजनम् ।

यस्य । होता । प्रातरनुवाकमिति प्रातः–अनुवाकम् ।

अनुब्रुवन्नित्यनु – ब्रुवन्न् । अग्निम् । अपः । आदित्यम् । अभीति ।

विपश्यतीति वि–पश्यति । उपेति । एनम् । उत्तर इत्युत् – तरः ।

यज्ञः । नमति । अभीति । सुवर्गमिति सुवः – गम् । लोकम् ।
जयति । आप्ते । देवयजन इति देव–यजने । याजयेत् ।
भ्रातृव्यवन्तमिति भ्रातृव्य – वन्तम् । पन्थाम् । वा ।
अधिस्पर्.शयेदित्यधि–स्पर्.शयेत् । कर्तम् । वा । यावत् । न ।
अनसे । यातवै । **30 (50)**

## TS 6.2.6.2

न रथायैतद्–वा आप्तं देवयजनमाप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य
आप्नोत्येकोन्नते देवयजने याजयेत् पशुकाम–मेकोन्नताद्–वै
देवयजनादङ्गिरसः पशूनसृजन्तान्तरा सदोहविर्द्धाने उन्नत७
स्यादेतद्–वा एकोन्नतं देवयजनं पशुमानेव भवति त्र्युन्नते देवयजने
याजयेथ् सुवर्गकामं त्र्युन्नताद्–वै देवयजनादङ्गिरसः सुवर्गं
ँलोकमाय–न्नन्तरा ऽऽहवनीयं च हविर्द्धानं चो– [ ] **31**

## TS 6.2.6.2 - Padam

न । रथाय । एतत् । वै । आप्तम् । देवयजनमिति देव – यजनम् ।
आप्नोति । एव । भ्रातृव्यम् । न । एनम् । भ्रातृव्यः । आप्नोति ।

एकोन्नत इत्येक–उन्नते । देवयजन इति देव – यजने । याजयेत् ।
पशुकाममिति पशु – कामम् । एकोन्नतादित्येक – उन्नतात् । वै ।
देवयजनादिति देव – यजनात् । अङ्गिरसः । पशून् । असृजन्त ।
अन्तरा । सदोहविर्द्धाने इति सदः–हविर्द्धाने ।
उन्नतमित्युत् – नतम् । स्यात् । एतत् । वै ।
एकोन्नतमित्येक – उन्नतम् । देवयजनमिति देव – यजनम् ।
पशुमानिति पशु – मान् । एव । भवति । त्र्युन्नत इति त्रि – उन्नते ।
देवयजन इति देव – यजने । याजयेत् । सुवर्गकाममिति
सुवर्ग – कामम् । त्र्युन्नतादिति त्रि – उन्नतात् । वै । देवयजनादिति
देव – यजनात् । अङ्गिरसः । सुवर्गमिति सुवः – गम् । लोकम् ।
आयन्न् । अन्तरा । आहवनीयमित्या–हवनीयम् । च । हविर्द्धानमिति
हविः – धानम् । च । **31 (50)**

**TS 6.2.6.3**

–न्नत७ स्यादन्तरा हविर्द्धानं च सदश्चान्तरा सदश्च गार्.हपत्यं
चैतद्–वै त्र्युन्नतं देवयजन७ं सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने

याजयेत् प्रतिष्ठाकाममेतद्–वै प्रतिष्ठितं देवयजनं ँयथ् सर्वतः समं प्रत्येव तिष्ठति यत्रान्याअन्या ओषधयो व्यतिषक्ताः स्यु स्तद्–याजयेत् पशुकाममेतद्–वै पशूना७ँ रूप७ँ रूपेणैवास्मै पशू– [ ] **32**

**TS 6.2.6.3 - Padam**

उन्नतमित्युत् – नतम् । स्यात् । अन्तरा । हविर्द्धानमिति हविः – धानम् । च । सदः । च । अन्तरा । सदः । च । गार्.हपत्यमिति गार्.ह – पत्यम् । च । एतत् । वै । त्र्युन्नतमिति त्रि – उन्नतम् । देवयजनमिति देव – यजनम् । सुवर्गमिति सुवः – गम् । एव । लोकम् । एति । प्रतिष्ठित इति प्रति – स्थिते । देवयजन इति देव – यजने । याजयेत् । प्रतिष्ठाकाममिति प्रतिष्ठा – कामम् । एतत् । वै । प्रतिष्ठितमिति प्रति – स्थितम् । देवयजनमिति देव – यजनम् । यत् । सर्वतः । समम् । प्रतीति । एव । तिष्ठति । यत्र । अन्याअन्या इत्यन्याः – अन्याः । ओषधयः । व्यतिषक्ता इति वि – अतिषक्ताः । स्युः । तत् । याजयेत् ।

पशुकाममिति पशु – कामम् । एतत् । वै । पशूनाम् । रूपम् ।
रूपेण । एव । अस्मै । पशून् । **32 (50)**

**TS 6.2.6.4**

नव रुन्धे पशुमानेव भवति निर्.ऋतिगृहीते देवयजने याजयेद्–यं
कामयेत निर्.ऋत्यास्य यज्ञं ग्राहयेयमित्येतद्–वै निर्.ऋतिगृहीतं
देवयजनं ँयथ् सदृश्यै सत्या ऋक्षं निर्.ऋत्यैवास्य यज्ञं ग्राहयति
व्यावृत्ते देवयजने याजयेद् व्यावृत्कामं ँयं पात्रे वा तल्पे वा
मीमाꣳसेरन् प्राचीनमाहवनीयात् प्रवणꣷ स्यात् प्रतीचीनं
गार्.हपत्यादेतद्–वै व्यावृत्तं देवयजनं ँवि पाप्मना ( ) भ्रातृव्येणाऽऽ
वर्तते नैनं पात्रे न तल्पे मीमाꣳसन्ते कार्ये देवयजने
याजयेद्–भूतिकामं कार्यो वै पुरुषो भवत्येव ॥ **33**

**TS 6.2.6.4 - Padam**

अवेति । रुन्धे । पशुमानिति पशु – मान् । एव । भवति ।
निर्.ऋतिगृहीत इति निर्.ऋति – गृहीते । देवयजन इति देव–यजने ।
याजयेत् । यम् । कामयेत । निर्.ऋत्येति निः – ऋत्या । अस्य ।

यज्ञम् । ग्राहयेयम् । इति । एतत् । वै ।
निर्.ऋतिगृहीतमिति निर्.ऋति – गृहीतम् । देवयजनमिति
देव – यजनम् । यत् । सदृश्यै । सत्याः । ऋक्षम् ।
निर्.ऋत्येति निः – ऋत्या । एव । अस्य । यज्ञम् । ग्राहयति ।
व्यावृत्त इति वि–आवृत्ते । देवयजन इति देव – यजने । याजयेत् ।
व्यावृत्काममिति व्यावृत्–कामम् । यम् । पात्रे । वा । तल्पे । वा ।
मीमा॒ꣳसेरन्न् । प्राचीनम् । आहवनीयादित्या – हवनीयात् ।
प्रवणमिति प्र – वनम् । स्यात् । प्रतीचीनम् ।
गार्.हपत्यादिति गार्.ह – पत्यात् । एतत् । वै । व्यावृत्तमिति
वि – आवृत्तम् । देवयजनमिति देव – यजनम् । वीति ।
पाप्मना ( ) । भ्रातृव्येण । एति । वर्तते । न । एनम् । पात्रे । न ।
तल्पे । मीमा॒ꣳसन्ते । कार्ये । देवयजन इति देव–यजने । याजयेत् ।
भूतिकाममिति भूति – कामम् । कार्यः । वै । पुरुषः । भवति ।
एव ॥ **33 (68)** ***(यातवै – हविर्धानं च – पशून् – पाप्मना – ऽष्टादश च) (A6)***

**TS 6.2.7.1**

तेभ्य उत्तरवेदिः सि॒ꣳही रूपं कृत्वोभया–नन्तराऽपक्रम्यातिष्ठत् ते

देवा अमन्यन्त यतरान्. वा इयमुपावर्थ्स्यति त इदं भविष्यन्तीति

तामुपामन्त्रयन्त सा ऽब्रवीद् वरं ँवृणै सर्वान् मया कामान् व्यश्ञवथ

पूर्वां तु मा ऽग्नेराहुति–रश्ञवता इति तस्मादुत्तरवेदिं पूर्वामग्ने–

र्व्याघारयन्ति वारेवृत॒ꣳ ह्यस्यै शम्यया परि मिमीते– [ ] **34**

**TS 6.2.7.1 - Padam**

तेभ्यः । उत्तरवेदिरित्युत्तर – वेदिः । सि॒ꣳहीः । रूपम् । कृत्वा ।

उभयान् । अन्तरा । अपक्रम्येत्यप – क्रम्य । अतिष्ठत् । ते । देवाः ।

अमन्यन्त । यतरान् । वै । इयम् । उपावर्थ्स्यतीत्युप–आवर्थ्स्यति ।

ते । इदम् । भविष्यन्ति । इति । ताम् । उपेति । अमन्त्रयन्त । सा ।

अब्रवीत् । वरम् । वृणै । सर्वान् । मया । कामान् । वीति ।

अश्ञवथ । पूर्वाम् । तु । मा । अग्नेः । आहुतिरित्या – हुतिः ।

अश्ञवतै । इति । तस्मात् । उत्तरवेदिमित्युत्तर – वेदिम् । पूर्वाम् ।

अग्नेः । व्याघारयन्तीति वि–आघारयन्ति । वारेवृतमिति वारे–वृतम् । हि । अस्यै । शम्यया । परीति । मिमीते । **34 (50)**

**TS 6.2.7.2**

मात्रैवास्यै सा ऽथो युक्तेनैव युक्तमव रुन्धे वित्तायनी मे ऽसीत्याह वित्ता ह्येनानावत् तिक्तायनी मे ऽसीत्याह तिक्तान्. ह्येनानावदवतान्मा नाथितमित्याह नाथितान्. ह्येनानावदवतान् मा व्यथितमित्याह व्यथितान्. ह्येनानावद्–विदेरग्निर्नभो नामा– [ ] **35**

**TS 6.2.7.2 - Padam**

मात्रा । एव । अस्यै । सा । अथो इति । युक्तेन । एव । युक्तम् । अवेति । रुन्धे । वित्तायनीति वित्त – अयनी । मे । असि । इति । आह । वित्ता । हि । एनान् । आवत् । तिक्तायनीति तिक्त – अयनी । मे । असि । इति । आह । तिक्तान् । हि । एनान् । आवत् । अवतात् । मा । नाथितम् । इति । आह । नाथितान् । हि । एनान् । आवत् । अवतात् । मा । व्यथितम् । इति । आह । व्यथितान् । हि । एनान् । आवत् । विदेः । अग्निः । नभः । नाम । **35 (50)**

**TS 6.2.7.3**

ग्ने अङ्गिर इति त्रिर्. हरति य एवैषु लोकेष्वग्नय-स्तानेवाव रुन्धे

तूष्णीं चतुर्थꣳ हरत्यनि-रुक्तमेवाव रुन्धे सिꣳहीरसि

महिषीरसीत्याह सिꣳहीर्ह्येषा रूपं कृत्वोभया-नन्तरा ऽपक्रम्यातिष्ठदुरु

प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः

प्रथयति ध्रुवा- [ ] **36**

**TS 6.2.7.3 - Padam**

अग्ने । अङ्गिरः । इति । त्रिः । हरति । ये । एव । एषु । लोकेषु ।

अग्नयः । तान् । एव । अवेति । रुन्धे । तूष्णीम् । चतुर्थम् । हरति ।

अनिरुक्तमित्यनिः - उक्तम् । एव । अवेति । रुन्धे । सिꣳहीः ।

असि । महिषीः । असि । इति । आह । सिꣳहीः । हि । एषा ।

रूपम् । कृत्वा । उभयान् । अन्तरा । अपक्रम्येत्यप - क्रम्य ।

अतिष्ठत् । उरु । प्रथस्व । उरु । ते । यज्ञपतिरिति यज्ञ - पतिः ।

प्रथताम् । इति । आह । यजमानम् । एव । प्रजयेति प्र - जया ।

पशुभिरिति पशु - भिः । प्रथयति । ध्रुवा । **36 (50)**

**TS 6.2.7.4**

ऽसीति स२ँ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः शुंभस्वेत्यव चोक्षति प्र च किरति शुद्ध्या इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पात्वित्याह दिग्भ्य एवैनां प्रोक्षति देवा२श्चेदु–त्तरवेदिरुपाववर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपा– [ ] **37**

**TS 6.2.7.4 - Padam**

असि । इति । समिति । हन्ति । धृत्यै । देवेभ्यः । शुन्धस्व । देवेभ्यः । शुम्भस्व । इति । अवेति । च । उक्षति । प्रेति । च । किरति । शुद्ध्यै । इन्द्रघोष इतीन्द्र – घोषः । त्वा । वसुभिरिति वसु – भिः । पुरस्तात् । पातु । इति । आह । दिग्भ्य इति दिक् – भ्यः । एव । एनाम् । प्रेति । उक्षति । देवान् । च । इत् । उत्तरवेदिरित्युत्तर – वेदिः । उपाववर्तीत्युप – आववर्ति । इह । एव । वीति । जयामहै । इति । असुराः । वज्रम् । उद्यत्येत्युत् – यत्य ।

देवान् । अभीति । आयन्त । तान् । इन्द्रघोष इतीन्द्र – घोषः । वसुभिरिति वसु – भिः । पुरस्तात् । अपेति । **37 (50)**

**TS 6.2.7.5**

–नुदत मनोजवाः पितृभि र्दक्षिणतः प्रचेता रुद्रैः पश्चाद्–विश्वकर्मा ऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति दिग्भ्य एव तद्–यजमानो भ्रातृव्यान् प्र णुदत इन्द्रो यतीन्थ् सालावृकेभ्यः प्रायच्छत् तान् दक्षिणत उत्तरवेद्या आदन्. यत् प्रोक्षणीना–मुच्छिष्येत तद् दक्षिणत उत्तरवेद्यै नि नयेद्–यदेव तत्र क्रूरं तत् तेन शमयति यं द्विष्यात् तं ध्यायेच्छुचै ( ) वैनमर्पयति ॥ **38**

**TS 6.2.7.5 - Padam**

अनुदत । मनोजवा इति मनः – जवाः । पितृभिरिति पितृ – भिः । दक्षिणतः । प्रचेता इति प्र – चेताः । रुद्रैः । पश्चात् । विश्वकर्मेति विश्व – कर्मा । आदित्यैः । उत्तरत इत्युत् – तरतः । यत् । एवम् । उत्तरवेदिमित्युत्तर – वेदिम् । प्रोक्षतीति प्र – उक्षति । दिग्भ्य इति दिक् – भ्यः । एव । तत् । यजमानः । भ्रातृव्यान् । प्रेति । नुदते ।

इन्द्रः । यतीन् । सालावृकेभ्यः । प्रेति । अयच्छत् । तान् ।

दक्षिणतः । उत्तरवेद्या इत्युत्तर – वेद्याः । आदन्न् । यत् ।

प्रोक्षणीनामिति प्र – उक्षणीनाम् । उच्छिष्येतेत्युत् – शिष्येत । तत् ।

दक्षिणतः । उत्तरवेद्या इत्युत्तर – वेद्यै । नीति । नयेत् । यत् । एव ।

तत्र । क्रूरम् । तत् । तेन । शमयति । यम् । द्विष्यात् । तम् । ध्यायेत् ।

शुचा ( ) । एव । एनम् । अर्पयति ॥ **38 (53)**

*(मिमीते – नाम – ध्रुवा – ऽप – शुचा – त्रीणि च) (A7)*

**TS 6.2.8.1**

सोत्तरवेदिरब्रवीथ् सर्वान् मया कामान् व्यश्ञवथेति ते देवा

अकामयन्तासुरान् भ्रातृव्यानभि भवेमेति ते ऽजुहवुः सिꣳहीरसि

सपत्नसाही स्वाहेति ते ऽसुरान् भ्रातृव्या–नभ्यभवन् ते ऽसुरान्

भ्रातृव्या–नभिभूयाकामयन्त प्रजां ँविन्देमहीति ते ऽजुहवुः सिꣳहीरसि

सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजां ँवित्त्वा– [ ] **39**

**TS 6.2.8.1 - Padam**

सा । उत्तरवेदिरित्युत्तर–वेदिः । अब्रवीत् । सर्वान् । मया । कामान् ।

वीति । अश्ञवथ । इति । ते । देवाः । अकामयन्त । असुरान् ।

भ्रातृव्यान् । अभीति । भवेम । इति । ते । अजुहवुः । सिꣳहीः ।

असि । सपत्नसाहीति सपत्न – साही । स्वाहा । इति । ते ।

असुरान् । भ्रातृव्यान् । अभीति । अभवन्न् । ते । असुरान् ।

भ्रातृव्यान् । अभिभूयेत्यभि – भूय । अकामयन्त । प्रजामिति

प्र–जाम् । विन्देमहि । इति । ते । अजुहवुः । सिꣳहीः । असि ।

सुप्रजावनिरिति सुप्रजा – वनिः । स्वाहा । इति । ते ।

प्रजामिति प्र–जाम् । अविन्दन्त । ते । प्रजामिति प्र – जाम् ।

वित्त्वा । **39 (50)**

**TS 6.2.8.2**

ऽकामयन्त पशून्. विन्देमहीति ते ऽजुहवुः सिꣳहीरसि रायस्पोषवनिः

स्वाहेति ते पशूनविन्दन्त ते पशून्. वित्त्वाऽकामयन्त प्रतिष्ठां

ँविन्देमहीति ते ऽजुहवुः सिꣳही–रस्यादित्यवनिः स्वाहेति त इमां

प्रतिष्ठामविन्दन्त त इमां प्रतिष्ठां ँवित्त्वा ऽकामयन्त देवता आशिष

उपेयामेति तेऽजुहवुः सिꣳहीरस्या वह देवान् देवयते– [ ] **40**

**TS 6.2.8.2 - Padam**

अकामयन्त । पशून् । विन्देमहि । इति । ते । अजुहवुः । सिꣳहीः ।

असि । रायस्पोषवनिरिति रायस्पोष – वनिः । स्वाहा । इति । ते ।

पशून् । अविन्दन्त । ते । पशून् । वित्त्वा । अकामयन्त । प्रतिष्ठामिति

प्रति – स्थाम् । विन्देमहि । इति । ते । अजुहवुः । सिꣳहीः ।

असि । आदित्यवनिरित्यादित्य – वनिः । स्वाहा । इति । ते ।

इमाम् । प्रतिष्ठामिति प्रति – स्थाम् । अविन्दन्त । ते । इमाम् ।

प्रतिष्ठामिति प्रति – स्थाम् । वित्त्वा । अकामयन्त । देवताः ।

आशिष इत्या – शिषः । उपेति । इयाम । इति । ते । अजुहवुः ।

सिꣳहीः । असि । एति । वह । देवान् ।

देवयत इति देव – यते । **40 (50)**

**TS 6.2.8.3**

यजमानाय स्वाहेति ते देवता आशिष उपायन् पञ्च कृत्वो

व्याघारयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे ऽक्ष्णया

व्याघारयति तस्मादक्ष्णया पशवो ऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै

भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्–भागधेयं

तानेव तेन प्रीणाति पौतुद्रवान् परिधीन् परि दधात्येषां– [ ] **41**

**TS 6.2.8.3 - Padam**

यजमानाय । स्वाहा । इति । ते । देवताः । आशिष इत्या – शिषः ।

उपेति । आयन्न् । पञ्च । कृत्वः । व्याघारयतीति वि – आघारयति ।

पञ्चाक्षरेति पञ्च–अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव ।

अवेति । रुन्धे । अक्ष्णया । व्याघारयतीति वि–आघारयति । तस्मात् ।

अक्ष्णया । पशवः । अङ्गानि । प्रेति । हरन्ति । प्रतिष्ठित्या इति

प्रति – स्थित्यै । भूतेभ्यः । त्वा । इति । स्रुचम् । उदिति । गृह्णाति ।

ये । एव । देवाः । भूताः । तेषाम् । तत् । भागधेयमिति भाग–धेयम् ।

तान् । एव । तेन । प्रीणाति । पौतुद्रवान् । परिधीनिति परि – धीन् । परीति । दधाति । एषाम् । **41 (50)**

**TS 6.2.8.4**

ँल्लोकानां ँविधृत्या अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं ँवहन्तः प्रामीयन्त सो ऽग्निरबिभेदित्थं ँवाव स्य आर्तिमा ऽरिष्यतीति स निलायत स यां ँवनस्पतिष्ववसत् तां पूतुद्रौ यामोषधीषु ताꣳ सुगन्धितेजने यां पशुषु तां पेत्वस्यान्तरा शृङ्गे तं देवताः प्रैषमैच्छन् तमन्वविन्दन् तमब्रुव– [ ] **42**

**TS 6.2.8.4 - Padam**

लोकानाम् । विधृत्या इति वि–धृत्यै । अग्नेः । त्रयः । ज्यायाꣳसः । भ्रातरः । आसन्न् । ते । देवेभ्यः । हव्यम् । वहन्तः । प्रेति । अमीयन्त । सः । अग्निः । अबिभेत् । इत्थम् । वाव । स्यः । आर्तिम् । एति । अरिष्यति । इति । सः । निलायत । सः । याम् । वनस्पतिषु । अवसत् । ताम् । पूतुद्रौ । याम् । ओषधीषु । ताम् । सुगन्धितेजन इति सुगन्धि – तेजने । याम् । पशुषु । ताम् ।

पेत्वस्य । अन्तरा । शृङ्गे इति । तम् । देवताः । प्रैषमिति प्र–एषम् । ऐच्छन्न् । तम् । अन्विति । अविन्दन्न् । तम् । अब्रुवन्न् । **42 (50)**

**TS 6.2.8.5**

–न्नुप न आ वर्तस्व हव्यं नो वहेति सो ऽब्रवीद् वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति तस्माद्–यद्–गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद् भागधेयं तानेव तेन प्रीणाति सोऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः प्रामेषतास्थानि शातया इति स यान्य– [ ] **43**

**TS 6.2.8.5 - Padam**

उपेति । नः । एति । वर्तस्व । हव्यम् । नः । वह । इति । सः । अब्रवीत् । वरम् । वृणै । यत् । एव । गृहीतस्य । अहुतस्य । बहिःपरिधीति बहिः – परिधि । स्कन्दात् । तत् । मे । भ्रातृणाम् । भागधेयमिति भाग – धेयम् । असत् । इति । तस्मात् । यत् । गृहीतस्य । अहुतस्य । बहिःपरिधीति बहिः – परिधि । स्कन्दति । तेषाम् । तत् । भागधेयमिति भाग – धेयम् । तान् । एव । तेन ।

प्रीणाति । सः । अमन्यत । अस्थन्वन्त इत्यस्थन्न् – वन्तः । मे ।

पूर्वे । भ्रातरः । प्रेति । अमेषत । अस्थानि । शातयै । इति । सः ।

यानि । **43 (50)**

**TS 6.2.8.6**

–स्थान्यशातयत तत् पूतुद्रव–भवद्–यन्मा॑ꣳस–मुपमृतं तद्–गुल्गुलु

यदेतान्थ् संभारान्थ् सं भरत्यग्निमेव तथ् संभरत्यग्नेः पुरीष–

मसीत्याहाग्नेर्ह्येतत् पुरीषं ँयथ् संभारा अथो खल्वाहुरेते वावैनं ते

भ्रातरः परि शेरे यत् पौतुद्रवाः परिधय इति ॥ **44**

**TS 6.2.8.6 - Padam**

अस्थानि । अशातयत । तत् । पूतुद्रु । अभवत् । यत् । माꣳसम् ।

उपमृतमित्युप – मृतम् । तत् । गुल्गुलु । यत् । एतान् ।

संभारानिति सं – भारान् । सम्भरतीति सं–भरति । अग्निम् । एव ।

तत् । समिति । भरति । अग्नेः । पुरीषम् । असि । इति । आह ।

अग्नेः । हि । एतत् । पुरीषम् । यत् । संभारा इति सं – भाराः ।

अथो इति । खलु । आहुः । एते । वाव । एनम् । ते । भ्रातरः ।

परीति । शेरे । यत् । पौतुद्रवाः । परिधय इति परि–धयः ।
इति ॥ **44 (44)** *(वित्त्वा – देवयत – एषा – मब्रुवन् – यानि – चतुश्चत्वारि॑ँशच्च)* *(A8)*

**TS 6.2.9.1**

बद्धमव स्यति वरुणपाशादेवैने मुञ्चति प्र णेनेक्ति मेद्ध्ये एवैने करोति सावित्रियर्चा हुत्वा हविर्द्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः स यदुथ्सर्जेद्–यजमानस्य गृहा–नभ्युथ्सर्जेथ् सुवाग् देव दुर्या॑ँ आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्न्यु– [ ] **45**

**TS 6.2.9.1 - Padam**

बद्धम् । अवेति । स्यति । वरुणपाशादिति वरुण – पाशात् । एव ।
एने इति । मुञ्चति । प्रेति । नेनेक्ति । मेद्ध्ये इति । एव । एने इति ।
करोति । सावित्रिया । ऋचा । हुत्वा । हविर्द्धाने इति हविः–धाने ।
प्रेति । वर्तयति । सवितृप्रसूत इति सवितृ – प्रसूतः । एव ।
एने इति । प्रेति । वर्तयति । वरुणः । वै । एषः ।

दुर्वागिति दुः – वाक् । उभयतः । बद्धः । यत् । अक्षः । सः ।
यत् । उथ्सर्जेदित्युत् – सर्जेत् । यजमानस्य । गृहान् ।
अभ्युथ्सर्जेदित्यभि – उथ्सर्जेत् । सुवागिति सु – वाक् । देव ।
दुर्यान् । एति । वद । इति । आह । गृहाः । वै । दुर्याः । शान्त्यै ।
पत्नी । **45 (50)**

**TS 6.2.9.2**

–पानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्–वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवैष यज्ञस्या–न्वारंभोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्यां ँवर्त्मनो र्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाꣳस्यप हन्ति यदद्ध्वर्यु–रनग्ना–वाहुतिं जुहुया–दन्धोऽद्ध्वर्युः स्याद्–रक्षाꣳसि यज्ञꣳ हन्युर्– [ ] **46**

**TS 6.2.9.2 - Padam**

उपेति । अनक्ति । पत्नी । हि । सर्वस्य । मित्रम् । मित्रत्वायेति
मित्र – त्वाय । यत् । वै । पत्नी । यज्ञस्य । करोति । मिथुनम् ।

तत् । अथो इति । पत्नियाः । एव । एषः । यज्ञस्य । अन्वारंभ इत्यनु – आरंभः । अनवच्छित्त्या इत्यनव – छित्त्यै । वर्त्मना । वै । अन्वित्येत्यनु – इत्य । यज्ञम् । रक्षाᳬंसि । जिघाᳬंसन्ति । वैष्णवीभ्याम् । ऋग्भ्यामित्यृक्–भ्याम् । वर्त्मनोः । जुहोति । यज्ञः । वै । विष्णुः । यज्ञात् । एव । रक्षाᳬंसि । अपेति । हन्ति । यत् । अद्ध्वर्युः । अनग्नौ । आहुतिमित्या – हुतिम् । जुहुयात् । अन्धः । अद्ध्वर्युः । स्यात् । रक्षाᳬंसि । यज्ञम् । हन्युः । **46 (50)**

**<u>TS 6.2.9.3</u>**

–हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धो ऽद्ध्वर्युर्भवति न यज्ञᳬं रक्षाᳬंसि घ्नन्ति प्राची प्रेतमद्ध्वरं कल्पयन्ती इत्याह सुवर्गमेवैने लोकं गमयत्यत्र रमेथां ँवर्ष्मन् पृथिव्या इत्याह वर्ष्म ह्येतत् पृथिव्या यद् देवयजनᳬं शिरो वा एतद्–यज्ञस्य यद्धविर्द्धानं दिवो वा विष्णवुत वा पृथिव्या– [ ] **47**

**TS 6.2.9.3 - Padam**

हिरण्यम् । उपास्येत्युप – अस्य । जुहोति । अग्निवतीत्यग्नि–वति । एव । जुहोति । न । अन्धः । अद्ध्वर्युः । भवति । न । यज्ञम् । रक्षाꣳसि । घ्नन्ति । प्राची इति । प्रेति । इतम् । अद्ध्वरम् । कल्पयन्ती इति । इति । आह । सुवर्गमिति सुवः – गम् । एव । एने इति । लोकम् । गमयति । अत्र । रमेथाम् । वर्ष्मन्न् । पृथिव्याः । इति । आह । वर्ष्म । हि । एतत् । पृथिव्याः । यत् । देवयजनमिति देव – यजनम् । शिरः । वै । एतत् । यज्ञस्य । यत् । हविर्द्धानमिति हविः–धानम् । दिवः । वा । विष्णो । उत । वा । पृथिव्याः । **47 (50)**

**TS 6.2.9.4**

इत्याशीर्पदयर्चा दक्षिणस्य हविर्द्धानस्य मेथीं नि हन्ति शीर्.षत एव यज्ञस्य यजमान आशिषो ऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्द्धानस्य वषट्कारे–णाक्ष–मच्छिनद्–यत्–तृतीयं छदिर्. हविर्द्धानयो–रुदाह्रियते तृतीयस्य हविर्द्धानस्यावरुद्ध्यै शिरो वा एतद्–यज्ञस्य यद्धविर्द्धानं ँविष्णो रराटमसि विष्णोः पृष्ठमसीत्याह

तस्मादेतावद्धा शिरो विष्यूतं ँविष्णोः ( ) स्यूरसि

विष्णोर् ध्रुवमसीत्याह वैष्णव७ं हि देवतया हविर्द्धानं ँयं प्रथमं

ग्रन्थिं ग्रथ्नीयाद्–यत् तं न विस्र७ं॒सयेदमेहेनाद्ध्वर्युः प्र मीयेत

तस्माथ् स विस्रस्यः ॥ **48**

**<u>TS 6.2.9.4 - Padam</u>**

इति । आशीर्पदयेत्याशीः – पदया । ऋचा । दक्षिणस्य ।

हविर्द्धानस्येति हविः – धानस्य । मेथीम् । नीति । हन्ति ।

शीर्.षतः । एव । यज्ञस्य । यजमानः । आशिष इत्या – शिषः ।

अवेति । रुन्धे । दण्डः । वै । औपरः । तृतीयस्य ।

हविर्द्धानस्येति हविः – धानस्य । वषट्कारेणेति वषट् – कारेण ।

अक्षम् । अच्छिनत् । यत् । तृतीयम् । छदिः । हविर्द्धानयोरिति

हविः–धानयोः । उदाह्रियत इत्युत् – आह्रियते । तृतीयस्य ।

हविर्द्धानस्येति हविः – धानस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।

शिरः । वै । एतत् । यज्ञस्य । यत् । हविर्द्धानमिति हविः–धानम् ।

विष्णोः । रराटम् । असि । विष्णोः । पृष्ठम् । असि । इति । आह ।

तस्मात् । एतावद्धेत्येतावत् - धा । शिरः ।

विष्यूतमिति वि - स्यूतम् । विष्णोः ( ) । स्यूः । असि । विष्णोः ।

ध्रुवम् । असि । इति । आह । वैष्णवम् । हि । देवतया ।

हविर्द्धानमिति हविः - धानम् । यम् । प्रथमम् । ग्रन्थिम् ।

ग्रथ्नीयात् । यत् । तम् । न । विस्रꣳसयेदिति वि - स्रꣳसयेत् ।

अमेहेन । अद्ध्वर्युः । प्रेति । मीयेत । तस्मात् । सः ।

विस्रस्य इति वि-स्रस्यः ॥ **48 (76)** *(पत्नी -हन्वु-र्वा पृथिव्या-*

*विष्यूतं विष्णोः-षड्विꣳशतिश्च) (A9)*

**TS 6.2.10.1**

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमा दत्ते प्रसूत्या

अश्विनो र्बाहुभ्यामित्याहाश्विनौ हि देवानामद्ध्वर्यू आस्तां पूष्णो

हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदभ्रिरभ्रिरसि नारिरसीत्याह

शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति

परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या-[ ]**49**

**TS 6.2.10.1 - Padam**

देवस्य । त्वा । सवितुः । प्रसव इति प्र –सवे । इति । अश्विम् ।
एति । दत्ते । प्रसूत्या इति प्र – सूत्यै । अश्विनोः । बाहुभ्यामिति
बाहु–भ्याम् । इति । आह । अश्विनौ । हि । देवानाम् ।
अद्ध्वर्यू इति । आस्ताम् । पूष्णः । हस्ताभ्याम् । इति । आह ।
यत्यै । वज्रः । इव । वै । एषा । यत् । अभ्रिः । अभ्रिः । असि ।
नारिः । असि । इति । आह । शान्त्यै । काण्डेकाण्ड इति
काण्डे – काण्डे । वै । क्रियमाणे । यज्ञम् । रक्षाꣳसि ।
जिघाꣳसन्ति । परिलिखितमिति परि – लिखितम् । रक्षः ।
परिलिखिता इति परि – लिखिताः । अरातयः । इति । आह ।
रक्षसाम् । अपहत्या इत्यप – हत्यै । **49 (50)**

**TS 6.2.10.2**

इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि यो ऽस्मान् द्वेष्टि यं च वयं
द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवा–

नन्तरायं ग्रीवाः कृन्तति दिवे त्वा ऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनां ँल्लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात्– [ ] **50**

**TS 6.2.10.2 - Padam**

इदम् । अहम् । रक्षसः । ग्रीवाः । अपीति । कृन्तामि । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । इति । आह । द्वौ । वाव । पुरुषौ । यम् । च । एव । द्वेष्टि । यः । च । एनम् । द्वेष्टि । तयोः । एव । अनन्तरायमित्यनन्तः – आयम् । ग्रीवाः । कृन्तति । दिवे । त्वा । अन्तरिक्षाय । त्वा । पृथिव्यै । त्वा । इति । आह । एभ्यः । एव । एनाम् । लोकेभ्यः । प्रेति । उक्षति । परस्तात् । अर्वाचीम् । प्रेति । उक्षति । तस्मात् । **50 (50)**

**TS 6.2.10.3**

परस्तादर्वाचीं मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत् करोति यत् खनत्यपो ऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुंबर ऊर्जैवोर्ज७ं समर्धयति यजमानेन सम्मितौदुंबरी भवति

यावानेव यजमानस्तावती–मेवास्मि–न्नूर्जं दधाति पितृणा॑ं

सदनमसीति बर्.हिरव स्तृणाति पितृदेवत्या(1)॑ं– [ ] **51**

**TS 6.2.10.3 - Padam**

परस्तात् । अर्वाचीम् । मनुष्याः । ऊर्जम् । उपेति । जीवन्ति ।

क्रूरम् । इव । वै । एतत् । करोति । यत् । खनति । अपः । अवेति ।

नयति । शान्त्यै । यवमतीरिति यव – मतीः । अवेति । नयति ।

ऊर्क् । वै । यवः । ऊर्क् । उदुम्बरः । ऊर्जा । एव । ऊर्जम् ।

समिति । अर्द्धयति । यजमानेन । सम्मितेति सं – मिता ।

औदुंबरी । भवति । यावान् । एव । यजमानः । तावतीम् । एव ।

अस्मिन्न् । ऊर्जम् । दधाति । पितृणाम् । सदनम् । असि । इति ।

बर्.हिः । अवेति । स्तृणाति ।

पितृदेवत्यमिति पितृ – देवत्यम् । **51 (50)**

**TS 6.2.10.4**

ह्येतद्–यन्निखातं ँयद्–बर्.हिरनवस्तीर्य मिनुयात् पितृदेवत्या

निखाता स्याद्–बर्.हिरवस्तीर्य मिनोत्यस्यामेवैनां मिनोत्यथो

स्वारुहमेवैनां करोत्युद्-दिव॒ᳶ स्तभानाऽऽ *न्तरिक्षं पृणेत्याहैषां

ँल्लोकानां ँविधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह द्युतानो ह

स्म वै मारुतो देवानामौदुंबरीं मिनोति तेनैवै– [ ] **52**

**TS 6.2.10.4 - Padam**

हि । एतत् । यत् । निखातमिति नि – खातम् । यत् । बर्.हिः ।

अनवस्तीर्येत्यनव–स्तीर्य । मिनुयात् । पितृदेवत्येति पितृ – देवत्या ।

निखातेति नि – खाता । स्यात् । बर्.हिः । अवस्तीर्येत्यव– स्तीर्य ।

मिनोति । अस्याम् । एव । एनाम् । मिनोति । अथो इति ।

स्वारुहमिति स्व–रुहम् । एव । एनाम् । करोति । उदिति । दिवम् ।

स्तभान । एति । अन्तरिक्षम् । पृण । इति । आह । एषाम् ।

लोकानाम् । विधृत्या इति वि – धृत्यै । द्युतानः । त्वा । मारुतः ।

मिनोतु । इति । आह । द्युतानः । ह । स्म । वै । मारुतः ।

देवानाम् । औदुंबरीम् । मिनोति । तेन । एव । **52 (50)**

**TS 6.2.10.5**

–नां मिनोति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतद् घृतेन
द्यावापृथिवी आ पृणेथामित्यौदुंबर्यां जुहोति द्यावापृथिवी एव
रसेनानक्त्या–न्तमन्व–वस्रावयत्यान्तमेव यजमानं तेजसा
ऽनक्त्यैन्द्रमसीति छदिरधि नि दधात्यैन्द्र९ँ हि देवतया सदो
विश्वजनस्य छायेत्याह विश्वजनस्य ह्येषा छाया यथ् सदो
नवछदि– [ ] **53**

**TS 6.2.10.5 - Padam**

एनाम् । मिनोति । ब्रह्मवनिमिति ब्रह्म – वनिम् । त्वा । क्षत्रवनिमिति
क्षत्र – वनिम् । इति । आह । यथायजुरिति यथा – यजुः । एव ।
एतत् । घृतेन । द्यावापृथिवी इति द्यावा–पृथिवी । एति । पृणेथाम् ।
इति । औदुंबर्याम् । जुहोति । द्यावापृथिवी इति द्यावा – पृथिवी ।
एव । रसेन । अनक्ति । आन्तमित्या – अन्तम् ।
अन्ववस्रावयतीत्यनु –अवस्रावयति । आन्तमित्या–अन्तम् । एव ।
यजमानम् । तेजसा । अनक्ति । ऐन्द्रम् । असि । इति । छदिः ।

अधि । नीति । दधाति । ऐन्द्रम् । हि । देवतया । सदः ।
विश्वजनस्येति विश्व – जनस्य । छाया । इति । आह ।
विश्वजनस्येति विश्व – जनस्य । हि । एषा । छाया । यत् । सदः ।
नवछदीति नव – छदि । **53 (50)**

**<u>TS 6.2.10.6</u>**

तेजस्कामस्य मिनुयात् त्रिवृता स्तोमेन सम्मितं तेजस्त्रिवृत् तेजस्व्येव भव–त्येकादश–छदीन्द्रियकाम–स्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशछदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशछदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकवि७्शतिछदि प्रतिष्ठाकाम–स्यैकवि७्शः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या उदरं ँवै सद ऊर्गुदुंबरो मद्ध्यत औदुंबरीं मिनोति मद्ध्यत एव प्रजानामूर्जं दधाति तस्मान्– [ ] **54**

**<u>TS 6.2.10.6 - Padam</u>**

तेजस्कामस्येति तेजः – कामस्य । मिनुयात् । त्रिवृतेति त्रि–वृता ।
स्तोमेन । सम्मितमिति सं – मितम् । तेजः । त्रिवृदिति त्रि –वृत् ।

तेजस्वी । एव । भवति । एकादशछदीत्येकादश – छदि ।
इन्द्रियकामस्येतीन्द्रिय – कामस्य । एकादशाक्षरेत्येकादश–अक्षरा ।
त्रिष्टुक् । इन्द्रियम् । त्रिष्टुक् । इन्द्रियावी । एव । भवति ।
पञ्चदशछदीति पञ्चदश–छदि । भ्रातृव्यवत इति भ्रातृव्य – वतः ।
पञ्चदश इति पञ्च – दशः । वज्रः । भ्रातृव्याभिभूत्या इति
भ्रातृव्य – अभिभूत्यै । सप्तदशछदीति सप्तदश – छदि ।
प्रजाकामस्येति प्रजा – कामस्य । सप्तदश इति सप्त – दशः ।
प्रजापतिरिति प्रजा – पतिः । प्रजापतेरिति प्रजा – पतेः ।
आप्त्यै । एकवि॒ंशतिछदीत्येकवि॒ंशति – छदि ।
प्रतिष्ठाकामस्येति प्रतिष्ठा – कामस्य । एकवि॒ंश इत्येक–वि॒ंशः ।
स्तोमानां । प्रतिष्ठेति प्रति – स्था । प्रतिष्ठित्या इति प्रति – स्थित्यै ।
उदरम् । वै । सदः । ऊर्क् । उदुंबरः । मद्ध्यतः । औदुंबरीम् ।
मिनोति । मद्ध्यतः । एव । प्रजानामिति प्र – जानाम् । ऊर्जम् ।
दधाति । तस्मात् । **54 (50)**

**TS 6.2.10.7**

मद्ध्यत ऊर्जा भुञ्जते यजमानलोके वै दक्षिणानि छदीꣳषि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमान-मेवा-यजमानादुत्तरं करोति तस्माद् यजमानोऽयजमानादुत्तरो ऽन्तर्वर्तान् करोति व्यावृत्त्यै तस्मादरण्यं प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रꣳ हि देवतया सदो ( ) यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्-यत् तं न विस्रꣳसये-दमेहेनाद्ध्वर्युः प्र मीयेत तस्माथ् स विस्रस्यः ॥ 55

**TS 6.2.10.7 - Padam**

मद्ध्यतः । ऊर्जा । भुञ्जते । यजमानलोक इति यजमान - लोके । वै । दक्षिणानि । छदीꣳषि । भ्रातृव्यलोक इति भ्रातृव्य - लोके । उत्तराणीत्युत् - तराणि । दक्षिणानि । उत्तराणीत्युत् - तराणि । करोति । यजमानम् । एव । अयजमानात् । उत्तरमित्युत् - तरम् । करोति । तस्मात् । यजमानः । अयजमानात् । उत्तर इत्युत् - तरः । अन्तर्वर्तानित्यन्तः - वर्तान् । करोति । व्यावृत्त्या इति वि-आवृत्त्यै ।

तस्मात् । अरण्यम् । प्रजा इति प्र – जाः । उपेति । जीवन्ति ।
परीति । त्वा । गिर्वणः । गिरः । इति । आह । यथायजुरिति
यथा – यजुः । एव । एतत् । इन्द्रस्य । स्यूः । असि । इन्द्रस्य ।
ध्रुवम् । असि । इति । आह । ऐन्द्रम् । हि । देवतया । सदः ( ) ।
यम् । प्रथमम् । ग्रन्थिम् । ग्रथ्नीयात् । यत् । तम् । न ।
विस्रꣳसयेदिति वि – स्रꣳसयेत् । अमेहेन । अद्ध्वर्युः । प्रेति ।
मीयेत । तस्मात् । सः । विस्रस्य इति वि – स्रस्यः ॥ **55 (65)**

***(अपहत्यै – तस्मात् – पितृदेवत्यं – तेनैव – नवछदि – तस्माथ् – सदः – पञ्चदश च) (A10)***

**TS 6.2.11.1**

शिरो वा एतद्–यज्ञस्य यद्धविर्द्धानं प्राणा उपरवा हविर्द्धाने
खायन्ते तस्माच्छीर्.षन् प्राणा अधस्तात् खायन्ते
तस्मादधस्ताच्छीर्ष्णः प्राणा रक्षोहणो वलगहनो वैष्णवान्
खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां

प्राणेषु वलगान् न्यखनन् तान् बाहुमात्रे ऽन्वविन्दन् तस्माद् बाहुमात्राः खायन्त इदमहं तं वँलगमुद्–वपामि– [ ] **56**

**TS 6.2.11.1 - Padam**

शिरः । वै । एतत् । यज्ञस्य । यत् । हविर्द्धानमिति हविः–धानम् । प्राणा इति प्र – अनाः । उपरवा इत्युप – रवाः । हविर्द्धान इति हविः–धाने । खायन्ते । तस्मात् । शीर्.षन्न् । प्राणा इति प्र–अनाः । अधस्तात् । खायन्ते । तस्मात् । अधस्तात् । शीर्ष्णः । प्राणा इति प्र–अनाः । रक्षोहण इति रक्षः–हनः । वलगहन इति वलग–हनः । वैष्णवान् । खनामि । इति । आह । वैष्णवाः । हि । देवतया । उपरवा इत्युप – रवाः । असुराः । वै । निर्यन्त इति निः – यन्तः । देवानाम् । प्राणेष्विति प्र – अनेषु । वलगानिति वल–गान् । नीति । अखनन्न् । तान् । बाहुमात्र इति बाहु–मात्रे । अन्विति । अविन्दन्न् । तस्मात् । बाहुमात्रा इति बाहु – मात्राः । खायन्ते । इदम् । अहम् । तम् । वलगमिति वल – गम् । उदिति । वपामि । **56 (50)**

**TS 6.2.11.2**

यं नः समानो य–मसमानो निचखानेत्याह द्वौ वाव पुरुषौ
यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्–
वपति सं तृणत्ति तस्माथ् सन्तृण्णा अन्तरतः प्राणा न सं भिनत्ति
तस्मादसंभिन्नाः प्राणा अपो ऽव नयति तस्मादार्द्रा अन्तरतः प्राणा
यवमतीरव नय– [ ] **57**

**TS 6.2.11.2 - Padam**

यम् । नः । समानः । यम् । असमानः । निचखानेति नि–चखान ।
इति । आह । द्वौ । वाव । पुरुषौ । यः । च । एव । समानः । यः ।
च । असमानः । यम् । एव । अस्मै । तौ । वलगमिति वल – गम् ।
निखनत इति नि – खनतः । तम् । एव । उदिति । वपति । समिति ।
तृणत्ति । तस्मात् । सन्तृण्णा इति सं – तृण्णाः । अन्तरतः ।
प्राणा इति प्र – अनाः । न । समिति । भिनत्ति । तस्मात् ।
असंभिन्ना इत्यसं – भिन्नाः । प्राणा इति प्र – अनाः । अपः ।
अवेति । नयति । तस्मात् । आर्द्राः । अन्तरतः ।

प्राणा इति प्र – अनाः । यवमतीरिति यव – मतीः । अवेति । नयति । **57 (50)**

**TS 6.2.11.3**

–त्यूर्ग्वै यवः प्राणा उपरवाः प्राणेष्वेवोर्जं दधाति बर्.हिरव स्तृणाति तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न सं तृणत्त्यसन्तृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्ये धृत्यै शिरो वा एतद्–यज्ञस्य यद्धविर्द्धानं– [ ] **58**

**TS 6.2.11.3 - Padam**

ऊर्क् । वै । यवः । प्राणा इति प्र – अनाः । उपरवा इत्युप–रवाः । प्राणेष्विति प्र – अनेषु । एव । ऊर्जम् । दधाति । बर्.हिः । अवेति । स्तृणाति । तस्मात् । लोमशाः । अन्तरतः । प्राणा इति प्र – अनाः । आज्येन । व्याघारयतीति वि – आघारयति । तेजः । वै । आज्यम् । प्राणा इति प्र – अनाः । उपरवा इत्युप – रवाः । प्राणेष्विति प्र – अनेषु । एव । तेजः । दधाति । हनू इति । वै । एते इति । यज्ञस्य । यत् । अधिषवणे इत्यधि–सवने । न । समिति । तृणत्ति ।

असन्तृण्णे इत्यसं – तृण्णे । हि । हनू इति । अथो इति । खलु । दीर्घसोम इति दीर्घ – सोमे । सन्तृद्ये इति सं–तृद्ये । धृत्यै । शिरः । वै । एतत् । यज्ञस्य । यत् । हविर्द्धानमिति हविः–धानम् । **58 (50)**

**TS 6.2.11.4**

प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिको–त्तरवेदि–रुदरꣳ सदो यदा खलु वै जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्द्धाने चर्मन्नधि ग्रावभि–रभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं ँवेद दुह एवै ( ) नामियं ँवै विराट् तस्यै त्वक् चर्मोधो ऽधिषवणे स्तना उपरवा ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं ँवेद दुह एवैनां ॥ **59**

**TS 6.2.11.4 - Padam**

प्राणा इति प्र – अनाः । उपरवा इत्युप – रवाः । हनू इति । अधिषवणे इत्यधि – सवने । जिह्वा । चर्म । ग्रावाणः । दन्ताः ।

मुखम् । आहवनीय इत्या – हवनीयः । नासिका ।
उत्तरवेदिरित्युत्तर – वेदिः । उदरम् । सदः । यदा । खलु । वै ।
जिह्वया । दथ्स्विति दत् –सु । अधीति । खादति । अथ । मुखम् ।
गच्छति । यदा । मुखम् । गच्छति । अथ । उदरम् । गच्छति ।
तस्मात् । हविर्द्धान इति हविः – धाने । चर्मन्न् । अधीति ।
ग्रावभिरिति ग्राव – भिः । अभिषुत्येत्यभि – सुत्य ।
आहवनीय इत्या – हवनीये । हुत्वा । प्रत्यञ्चः ।
परेत्येति परा – इत्य । सदसि । भक्षयन्ति । यः । वै ।
विराज इति वि – राजः । यज्ञमुख इति यज्ञ – मुखे । दोहम् ।
वेद । दुहे । एव ( ) । एनाम् । इयम् । वै । विराडिति वि – राट् ।
तस्यै । त्वक् । चर्म । ऊधः । अधिषवणे इत्यधि–सवने । स्तनाः ।
उपरवा इत्युप – रवाः । ग्रावाणः । वथ्साः । ऋत्विजः । दुहन्ति ।
सोमः । पयः । यः । एवम् । वेद । दुहे । एव । एनाम् ॥ **59 (73)**

*(वपामि–यवमतीरव नयति–हविर्द्धान–मेव–त्रयोविꣳशतिश्च) (A11)*

==============

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(यदुभौ – देवासुरा मिथ – स्तेषा७ं – सुवर्गं – ँयद्वा अनीशानः – पुरोहविषि – तेभ्यः – सोत्तरवेदि – र्बध्नन् – देवस्याभ्रिं ँवज्रः – शिरो वा – एकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यदुभा – वित्याह देवानां – ँयज्ञो देवेभ्यो – न रथाय – यजमानाय – परस्तादर्वाची – न्नव पञ्चाशत्)

**First and Last Padam of Second Prasnam of 6th Kandam**

(यदुभौ – दुह एवैनां)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठकाण्डे

द्वितीयः प्रश्नः समाप्तः ॥

---

**Details of Panchati and Padam for Kandam 6, Prasanam 2 (TS 6.2)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 7 | 341 |
| Anuvakam 2 | 7 | 361 |
| Anuvakam 3 | 5 | 266 |
| Anuvakam 4 | 5 | 275 |
| Anuvakam 5 | 5 | 263 |
| Anuvakam 6 | 4 | 218 |
| Anuvakam 7 | 5 | 253 |
| Anuvakam 8 | 6 | 294 |
| Anuvakam 9 | 4 | 226 |
| Anuvakam 10 | 7 | 365 |
| Anuvakam 11 | 4 | 223 |
| Total → | 59 | 3085 |

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**